केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
( प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः )

# स्थापनादिवससमारोहः



**दिनाङ्कः – 16/10/2023**

15/10/1970 तमे वर्षे प्रतिष्ठापितस्य 07/05/2002 तमे वर्षे मानितविश्वविद्यालयत्वमापन्नस्य पुनः 30/04/2020 तमे वर्षे केन्द्रीयसंस्कृतविश्वविद्यालयत्वेन समुन्नतदशां प्राप्तस्य च विश्वविद्यालयस्य त्रिपञ्चाशत्तमः स्थापनादिवसः (16/10/2023) मुख्यालये महता वैभवेन समायोजितः। अस्मिन् भव्ये समारोहे सारस्वतातिथिरूपेण समागतः **निवृत्तः IAS अधिकारी भाग्येश झा वर्यः** संस्कृतेनैव स्वीयं प्रभावोत्पादकं भाषणमकरोत्। भारतं विश्वगुरुत्वेन पुनः प्रतिष्ठापयितुं किं किं कर्तुं शक्यते इति सोदाहरणम् अवदत्। मोदीमहोदयेन सह गुर्जरप्रान्ते कार्यं कृतवतः अस्य महोदयस्य प्रतिभा अनितरसाधारणी वर्तते।

एवमेव विशिष्टातिथिरूपेण समागतः त्रिपुराराज्यस्य Deputy Speaker पदस्थः **श्री रामप्रसादपालवर्यः** अवोचत् यत् "संस्कृतविदुषां मध्ये अहम् अस्मि इत्यतः आत्मानं धन्यं मन्ये। सर्वेभ्यः स्थापनादिवसस्य शुभाशयाः" इति। सारस्वतातिथिरूपेण समागताः गुर्जरप्रान्तस्य श्री सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः **आचार्याः सुकान्त कुमार सेनापतिवर्याः** अवोचन् यत् "द्विचक्रिकास्थानके आरब्धः एषः विश्वविद्यालयः अधुना समग्रे भारते प्रख्यातः वर्तते इति। वैदेशिकाः अपि विद्याध्ययनाय एनमुपसर्पन्ति इति विशेषोत्कर्षः वर्तते" इति। तदग्रे उज्जैनस्थस्य महर्षिसान्दीपनिवेदविद्याप्रतिष्ठानस्य सचिवः **आचार्याः विरूपाक्षः जड्डीपालवर्याः** अवदन् यत् अहं केन्द्रीयसंस्कृतविश्वविद्यालयस्य एव सदस्यः आसम्। अस्य विश्वविद्यालयस्य विद्वांसः छात्राः कुलपतिप्रमुखाश्च स्थापनादिवससन्दर्भे अभिनन्दनपात्राणि सन्ति। वेदसंस्कृतयोः प्रचाराय वयं सर्वे एकीभूय कार्यं कुर्मः। भारतस्य प्रतिष्ठां च वर्धयितुम् अस्माकं सर्वेषां सहयोगः भवतु इति।

विश्वविद्यालयेन नूतनतया प्रकाशितानां ग्रन्थानां लोकार्पणं सन्दर्भेऽस्मिन् अभ्यागताः अकुर्वन्। ते च ग्रन्थाः यथा –

- **भीष्मगीता** (हिन्दीव्याख्यासहिता) - व्याख्याता श्रीरङ्गहरिः। महाभारतस्य शान्त्यनुशासनपर्वणोः चितः भीष्मयुधिष्ठिरसंवादरूपः राजधर्मस्य राष्ट्रधर्मस्य च प्रतिपादकः ग्रन्थः एषः।
- **धर्मचक्रप्रवर्तनम्** - बुद्धस्य जीवनचरितमधिकृत्य गुजरातविश्वविद्यालयस्य भाषासाहित्यविभागस्य पूर्वनिदेशकेन वसन्तकुमारभट्टवर्येण विरचितं संस्कृतनाटकम्। पञ्चसु अङ्केषु विभक्तं नाटकं वर्तते।
- **संस्कृतविमर्शः** - मुख्यालयेन प्रकाश्यमाना विद्वत्परिशीलिता अन्ताराष्ट्रियशोधपत्रिका वर्तते। अस्याः द्वाविंशत्तितमः अङ्कः (January 2022 to June 2022) प्रकाशितः वर्तते। UGC CARE Listed Journals सूच्यां विद्यमानायाम् अस्यां पत्रिकायां संस्कृतेन सह हिन्दी आङ्ग्लभाषायाम् उपनिबद्धाः शोधलेखाः सन्ति।
- **संस्कृतवार्ता** - त्रैमासिकी पत्रिका। अस्यां पत्रिकायां विश्वविद्यालयस्य विशिष्टोपलब्धयः, वार्तासङ्ग्रहः, छात्रोपलब्धयः, शिक्षकाणाम् उपलब्धयः च सङ्ग्रहेण सचित्रं वर्णिताः सन्ति। अस्मिन् चक्रे विशेषाङ्कसमन्विता एषा लोकार्पिता।

एतेषां ग्रन्थानां परिचयं प्रकाशनानुभागस्य उपनिदेशकेन डॉ. गणेश ति पण्डितवर्येण कृतम्।

कुलपतयः **आचार्याः श्रीनिवासः वरखेडीवर्याः** आध्यक्ष्यभाषणे अवदन् यत् - “विकासार्थम् अर्थेन सह पुरुषार्थस्यापि आवश्यकता वर्तते। अधिकारपदलिप्सा भगवति श्रीकृष्णे नासीत्। गान्धी अपि अधिकारपदं नेष्टवान्। निष्कामबुध्या कार्यं कर्तुं सर्वैः प्रयतनीयम्। फलानि स्वतः सिध्यन्ति च । 1970 तः आरभ्य 2023 पर्यन्तम् अस्माभिः उत्कर्षयात्रा अविच्छिन्नरूपेण कृता वर्तते। इयं विश्वविद्यालयविकासयात्रा अग्रेऽपि निर्विघ्नरूपेण प्रवर्तते इत्यत्र मम दृढविश्वासः” इति। कार्यक्षेत्रे शैक्षिकक्षेत्रे च परिश्रमं विधाय प्राप्तपुरस्काराणां विभिन्नपरिसरीयाणाम् आदर्शमहाविद्यालयानां शोधसंस्थानां मुख्यालयस्य मानवीयतत्वानाञ्च नामानि कुलपतयः सहर्षं समुदघोषयन्। तान् अभ्यनन्दन्।

आचार्यः रत्नमोहनझा वर्यः सर्वेभ्यः ससन्दर्भं धन्यवादान् समार्पयत्।

डा. पवनव्यासवर्यः समारोहस्य सुष्ठु सञ्चालनकार्यं निरवहत्। कुलपतीनां विशेषकार्याधिकारी आचार्यः मधुकेश्वरभट्टवर्यः समग्रस्यापि कार्यक्रमस्य व्यवस्थाप्रबन्धं सुष्ठु अकरोत्। कुलपतिपुरस्कारेण पुरस्कृतानां पट्टिका अपि सन्दर्भेऽस्मिन् प्रकटिता। कुलपतिपुरस्कारचयनसमितेः सदस्यः आचार्यः फतेह सिंहवर्यः कार्यक्रमे उपस्थितः आसीत्। मुख्यालयस्य शोधच्छात्राः कार्यक्रमस्य व्यवस्थाकर्मणि परिपूर्णं सहयोगं प्रायच्छन्। शान्तिमन्त्रेण मधुरभक्ष्यैश्च कार्यक्रमः सुसम्पन्नः।

















प्रतिवेदननिर्माणम् –
डॉ. गणेश ति. पण्डितः
उपनिदेशकः, प्रकाशनानुभागः